# आचार्यशान्तनवप्रणीतः फिट्सूत्रपाठः

| | अथ प्रथमः पादः | अनुवृत्तिः |
|---|---|---|
| 01. | फिषोऽन्त उदात्तः। | 4.19 |
| 02. | पाटलापालङ्काम्बासागरार्थानाम्। | |
| 03. | गेहार्थानामस्त्रियाम्। | 1.4 |
| 04. | गुदस्य च। | |
| 05. | ध्यपूर्वस्य स्त्रीविषयस्य। | |
| 06. | खान्तस्याश्मादेः। | |
| 07. | हिष्ठवत्सरतिशत्थान्तानाम्। | |
| 08. | दक्षिणस्य साधौ। | 1.10 |
| 09. | स्वाङ्गाख्यायामादिर्वा। | |
| 10. | छन्दसि च। | 1.12 |
| 11. | कृष्णस्यामृगाख्या चेत्। | 1.12 |
| 12. | वा नामधेयस्य। | 1.13 |
| 13. | शुक्लगौरयोरादिः। | |
| 14. | अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः। | 1.15 |
| 15. | पृष्ठस्य च। | |
| 16. | अर्जुनस्य तृणाख्या चेत्। | |
| 17. | अर्यस्य स्वाम्याख्या चेत्। | |
| 18. | आशाया अदिगाख्या चेत्। | |
| 19. | नक्षत्राणामाब्विषयाणाम्। | 1.20 |
| 20. | न कुपूर्वस्य कृत्तिकाख्या चेत्। | |
| 21. | घृतादीनां च। | |
| 22. | ज्येष्ठकनिष्ठयोर्वयसि। | |
| 23. | बिल्वतिष्ययोः स्वरितो वा। | |
| | ।। इति फिट्सूत्रेषु प्रथमः पादः ।। | |
| | फिष् = प्रातिपदिकम्।<br>नब् = नपुंसकम्।<br>यमन्वा = वृद्धः<br>अष् = अच्।<br>शिट् = सर्वनाम।<br>स्फिग् = लुब् = लुप्। | |

| | अथ द्वितीय पादः | अनुवृत्तिः |
|---|---|---|
| 01. | अथादिः★ प्राक्शकटेः। | 3.19 |
| 02. | ह्रस्वान्तस्य स्त्रीविषयस्य। | |
| 03. | नब्विषयस्यानिसन्तस्य। | |
| 04. | तृणधान्यानां च द्व्यषाम्। | |
| 05. | त्रः संख्यायाः। | |
| 06. | स्वाङ्गशिटामदन्तानाम्। | |
| 07. | प्राणिनां कुपूर्वम्। | |
| 08. | खय्युवर्णं कृत्रिमाख्या चेत्। | |
| 09. | उनर्वन्नन्तानाम्। | |
| 10. | वर्णानां तणतिनितान्तानाम्। | |
| 11. | ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये। | |
| 12. | अक्षस्यादेवनस्य। | |
| 13. | अर्धस्यासमद्योतने। | |
| 14. | पीतद्र्वर्थानाम्। | |
| 15. | ग्रामादीनां च। | |
| 16. | स्फिगन्तस्योपमेयनामधेयस्य। | 2.18, 2.17 |
| 17. | न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्। | |
| 18. | राजविशेषस्य यमन्वा चेत्। | |
| 19. | लघावन्ते द्वयोश्च बह्वषो गुरुः। | |
| 20. | स्त्रीविषयवर्णाक्षुपूर्वाणाम्। | |
| 21. | शकुनीनां च लघु पूर्वम्। | |
| 22. | नर्तु प्राण्याख्यायाम्। | |
| 23. | धान्यानां च वृद्धक्षान्तानाम्। | |
| 24. | जनपदशब्दानामषन्तानाम्। | 2.25 |
| 25. | हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा। | |
| 26. | इगन्तानां च द्व्यषाम्। | |
| | ।। इति फिट्सूत्रेषु द्वितीयः पादः।। | |
| | हय् = हल्।      ★ 2.8, 2.21 वर्ज्यं। | |

| | अथ तृतीयः पादः | अनुवृत्तिः |
|---|---|---|
| 01. | अथ द्वितीयं★1 प्रागीषात्। | 3.17 |
| 02. | त्र्यचां प्राङ् मकारात्। | 3.7 |
| 03. | स्वाङ्गानामकुर्वादीनाम्। | |
| 04. | मादीनां च। | |
| 05. | शादीनां शाकानाम्। | |
| 06. | पान्तानां गुर्वादीनाम्। | |
| 07. | युतान्यण्यन्तानाम्। | |
| 08. | मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षा - कलोमाकाष्ठापेष्ठाकाशीनामादिर्वा। | 3.12 |
| 09. | छन्दसि च। | |
| 10. | कर्दमादीनां च। | |
| 11. | सुगन्धितेजनस्य ते वा। | |
| 12. | नपः फलान्तानाम्। | |
| 13. | यान्तस्यान्त्यात्पूर्वम् ★2। | 3.15 |
| 14. | थान्तस्य च नालघुनी। | |
| 15. | शिशुमारोदुम्बरबलीवर्दोष्ट्रार- पुरूरवसां च। | |
| 16. | सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम्। | |
| 17. | ईषान्तस्य हयादेरादिर्वा। | 3.19 |
| 18. | उशीरदाशेरकपालपलालशैवालश्यामाक- शारीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्। | |
| 19. | महिष्यषाढयोर्जायेष्टकाख्या चेत्। | |
| | ।। इति फिट्सूत्रेषु तृतीयः पादः ।। | |
| | ★1 = 3.13, 3.14 वर्जं। ★2 = 14 वर्जं। | |

| | अथ चतुर्थ पादः | अनुवृत्तिः |
|---|---|---|
| 01. | शकटिशकट्योरक्षरमक्षरं पर्यायेण। | 4.5 |
| 02. | गोष्ठजस्य ब्राह्मणनामधेयस्य। | |
| 03. | पारावतस्योपोत्तमवर्जम्। | |
| 04. | धूम्रजानुमुंजकेशकालवाल<br>स्थालीपाकानामधूजलस्थानाम्। | |
| 05. | कपिकेशहरिकेशयोश्छन्दसि। | |
| 06. | न्यङ्स्वरौ स्वरितौ। | 4.9 |
| 07. | न्यर्बुदव्यल्कशयोरादिः। | |
| 08. | तिल्यशिक्यकाश्मर्यधान्यकन्या-<br>राजन्यमनुष्याणामन्तः। | 4.9 |
| 09. | बिल्वभक्ष्यवीर्याणि च्छन्दसि। | |
| 10. | त्वत्त्वसमसिमेत्यनुच्चानि। | |
| 11. | सिमस्याथर्वणेऽन्त उदात्तः। | |
| 12. | निपाता आद्युदात्ताः। | 4.13 |
| 13. | उपसर्गाश्चाभिवर्जम्। | |
| 14. | एवादीनामन्तः। | |
| 15. | वावादीनामुभावुदात्तौ। | |
| 16. | चादयोऽनुदात्ताः। | 4.17 |
| 17. | यथेति पादान्ते। | |
| 18. | प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः। | 4.19 |
| 19. | शेषं सर्वमनुदात्तम्। | |
| | ।। इति फिट्सूत्रेषु चतुर्थः पादः ।। | |
| | ।। इति आचार्यशान्तनवप्रणीतः फिट्सूत्रपाठः ।। | |